श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री अष्टाक्षरी स्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री अष्टाक्षरी स्तुतिः ॥

ओं नमः प्रणवार्थार्थ स्थूल सूक्ष्म क्षराक्षर।
व्यक्ताव्यक्त कळातीत ओंकाराय नमो नमः ॥ 1 ॥

नमो देवादिदेवाय देहसञ्चारहेतवे।
दैत्यसङ्घ विनाशाय नकाराय नमो नमः ॥ 2 ॥

मोहनं विश्वरूपं च शिष्टाचार सुपोषितम्।
मोह विध्वंसकं वन्दे मोकाराय नमो नमः ॥ 3 ॥

नारायणाय नव्याय नरसिंहाय नामिने।
नादाय नादिने तुभ्यं नाकाराय नमो नमः ॥ 4 ॥

रामचन्द्रं रघुपतिं पित्राज्ञ्य परिपालकम्।
कौसल्यातनयं वन्दे राकाराय नमो नमः ॥ 5 ॥

यज्ञाय यज्ञगम्याय यज्ञरक्षकराय च।
यज्ञाङ्ग रूपिणे तुभ्यं यकाराय नमो नमः ॥ 6 ॥

णाकारं लोकविख्यातं नानाजन्म फलप्रदम्।
नानाभीष्टप्रदं वन्दे णाकाराय नमो नमः ॥ 7 ॥

यज्ञकर्त्रे यज्ञभर्त्रे यज्ञरूपाय ते नमः।
सुज्ञान गोचरायास्तु यकाराय नमो नमः ॥ 8 ॥

ओंकारमन्त्र संयुक्तं नित्यं ध्यायन्ति योगिनः।
कामदं मोक्षदं तस्मै ओंकाराय नमो नमः ॥ 9 ॥

**नारायणः परं ब्रह्म नारायणः परन्तपः।**
**नारायणः परो देवः सर्वं नारायणस्सदा ॥ 10 ॥**

॥ इति श्री अष्टाक्षरी स्तुतिः समाप्ता ॥